ॐ

# ॥ श्रीमत् त्रिपुरसुन्दरीस्तवराजः ॥

यत्रैव यत्रैव मनो मदीयं

तत्रैव तत्रैव भवत्स्वरूपं

यत्रैव यत्रैव शिरो मदीयं

तत्रैव तत्रैव पदद्वयंते॥ १ ॥

या नित्यापरमाशक्तिर्जगच्चैतन्यरूपिणी

तांनमामिमहादेवीं पञ्चमीमात्मरूपिणीं॥ २ ॥

यस्यास्सर्वंसमुल्पन्नं यस्यांतत्प्रतितिष्टति

लयमेतिचयस्यांतां पञ्चमीं प्रणमाम्यहं॥ ३ ॥

शिवेसिन्दूरसन्दोहसुन्दरीस्वर्ण्णशोभिनी

करुणापूर्ण्णकल्लोलकटाक्षीकुलनायिके॥ ४ ॥

श्रीमत्कल्पतरोर्म्मूले भवान्या रत्नमन्दिरे

रत्नसिंहासने देव्याः श्रीचक्रं प्रणमाम्यहं॥ ५॥

भूगृहेगुणरेखाच वेदद्वारोपशोभितं

त्रिवृत्तंषोडशदळं तथाष्टदळकर्ण्णिकं॥ ६ ॥

शक्रारंद्विदशारञ्च वसुत्रैकोणबैन्दवं
एवमेतन्महाचक्रं नित्यंश्रीत्रिपुरालयं॥७॥

इन्द्रोमांरक्षयेत्प्राच्यामाग्नेय्यामग्निदेवता
याम्येयमस्सदापातु नैरृत्यांनिरृतिश्चमां॥८॥

पश्चिमेवरुणाःपातु वायव्यां वायुदेवता
धनदश्चोत्तरेपातु चेशान्यामीश्वरोवतु॥ ॥

ऊर्द्ध्वंप्रजापतिः पायादधश्चानन्ददेवता
एवंदशभिशोरक्षां कुर्य्युम्मे देवतागणाः॥९॥

गणेशसर्व्वदापातु क्षेत्रेशोरक्षयेत्सदा
द्वारश्रीसर्व्वदापातु गेहाळीपातुसर्वदा॥१०॥

गणनाथसदापातु दुर्गामांपरिरक्षतु
वटुकोभैरवःपातु क्षेत्रपालोभिरक्षतु॥११॥

सहरत्यासपत्न्याच कामदेवोभिरक्षतु
प्रीत्यासहवसन्तोपि पातुमांनन्दनंवनं॥१२॥

चक्रस्यपश्चिमेभागे भवान्यारत्नमन्दिरे

शंखपत्मनिधि रक्षां कुरुतांममसिद्धये॥ १३॥

पातुमांरत्नसोपानं पारमेश्वरशोभितं

रक्षयेत् पश्चिमेद्वारे भवान्यारत्नमन्दिरे॥ १४॥

सरस्वतीमहालक्ष्मीर्मयादुर्गाविभूतये

स्वस्तिकाभद्रकाळीच स्वाहाचैवशुभंकरी॥ १५॥

गौरीचलोकधात्रीच वागीश्वर्यादयोमम

एतौ  मञ्चस्थितासर्व्वा रक्षांकर्वन्तु सर्वदा॥ १६॥

शिवं कुर्वन्तुतासर्वाश्वासतेपञ्चदेवताः

श्रीविद्याशुद्धविद्याच मातंगीभुवनेश्वरी॥ १७॥

वाराहीपरमादेव्याः पञ्चविद्याश्चपान्तुमां

वसूनामधिपोब्रह्मास्त्रष्टारक्षतुसर्वदा॥ १८॥

कुलनाथसदापातु द्वीपनाथोपिसर्वदा

पाषण्डकारिणोभूता भूमौयेचान्तरिक्षगाः॥ १९॥

दिविलोकेस्थितायेच तेगच्छन्तुशिवाज्ञया

अपसर्प्पन्तुयेभूतायेभूताभुविसंस्थिताः॥ २०॥

येभूताविघ्नकर्त्तारस्तेगच्चन्तुशिवाज्ञया

पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता॥२१॥

त्वञ्चधारयमांदेवि पवित्रंकुरुचासनं

चक्रस्यदक्षिणेभागे श्रीमत्पात्रस्यमण्डले॥२२॥

पञ्चरत्नंसदापातुपूजकानाञ्चसिद्धये

तत्रपात्रासनेपुण्ये सर्वदावह्निमण्डले॥२३॥

वह्नेश्चमण्डलंपातु कुलदेव्याश्चपूजने

धूम्रार्च्चिरूष्माज्वलिनी ज्वालिनीविस्फुलिंगिनी॥२४॥

सुश्रिसुरुपाकपिला हव्याकव्यवहास्मृता

वह्नेर्दहकलाज्ञेया दशधर्मफलप्रदाः॥२५॥

एताभिसहितोरक्षां कुर्य्याद्वैश्वानरोमम

तत्र पात्रावरे दिव्ये श्रीमदादित्यमण्डले॥२६॥

सूर्यस्यमण्डलंपातु मम सर्वात्र्थसिद्धये

तपिनीतापिनीधूम्रामारीचिज्वालिनीरुचिः॥२७॥

सुषुम्नाभोगदाविश्वा बोधिनीधारिणीक्षमा

एताः कलाश्चसूर्यस्य सुर्यमण्डलसंस्थिताः॥२८॥

एताभिसहितोरक्षा मादित्य करुतात्सदा

तत्रपात्रामृतेदिव्ये सोमस्यामृतमण्डलं॥२९॥

प्रथमं सर्वदापातु भैरवानन्दहेतुकं

अमृतामानदापूषातुष्टिः पुष्टिर्मतिर्द्धृतिः॥३०॥

शशिनीचन्द्रिकाकान्तिर्ज्योत्स्नाश्रीःप्रीतिरंगदा

पूर्ण्णापूर्ण्णामृताकामदायिनीषोडशीकला॥३१॥

सोममण्डलमद्ध्यस्था रक्षांकुर्वन्तुसर्वदा

रविवेदकलापूर्ण्णेसुधासंपूर्ण्णमण्डले॥३२॥

नक्षत्राधिपतीरक्षां करोतुममभूतये

सूर्याग्निमण्डलेदिव्ये सम्पूर्ण्णेशशिमण्डले॥३३॥

पातुमांखेचरीबीजं दोषैकादशनाशकृत्

शक्तियुक्तैसुरानन्दभैर्वाद्यैसशक्तिभिः।३४॥।

आनन्दभैरवोरक्षां करोत्वमृतसिद्धये

यत्रपूर्ण्णामृतेपुण्ये शक्तिर्यावारुणीकला॥३५॥

आनन्दरूपिणीरक्षां करोतुममसर्वदा

सृष्टिर् ऋद्धिःस्मृतिर्म्मेदाकान्तिर्ल्लक्ष्मीर्द्युतिःस्थिरा॥३६॥

स्थितिसिद्धीरितिख्याता कचवर्ग्गकचादश
अकारात् ब्रह्मणोल्पन्नाः सृष्टिकर्मणितत्पराः॥३७॥

एताभिसहिरःपायात्ब्रह्मामां वाक्प्रदसदा
जरापपालिनीशान्तिरीश्वरीत्तिकामिके॥३८॥

वरदा ह्ळादिनीप्रीतिर्द्दीर्व्याञ्च्याष्टकवर्ग्गगाः
उकाराद्विष्णुसंभूताः स्थितिकर्मणितत्पराः॥३९॥

एताभिसहितःपायान्मां विष्णुः पुष्टदायकः
तीक्ष्णारौद्राभयान द्रातन्द्रीक्षुत् क्रोधिनीक्रिया॥४०॥

उत्गारमृत्युरूपाच वयवर्ग्गदशाकल
मकाराद्रुद्र संभूता संहारनिरतासदा॥४१॥

एताभिसहितोरुद्रोमां पायान्मृत्युनाशकः
तिरस्करिण्यापशुभृत्पञ्चेन्द्रिय विमोहिनी॥४२॥

अनन्तान्ताःस्तुताः पञ्चपीताश्वेतारुणासिता
बिन्दोरीश्वरसंभूताष्षळवर्ग्गकलास्तथा॥४३॥

तिरोधानपराभिर्मां पायादेताभिरीश्वरः
निवृत्तिश्चप्रतिष्ठाच विद्याशान्तिस्तथैवच॥४४॥

दीपिकारोधिकाचैव मोचिकाचवरातथा
सूक्ष्मासूक्ष्मामृताज्ञान अमृताप्यायिनीतथा॥४५॥

व्यापिनीव्योमरूपाच अनन्ताचेतिषोडश
एताःस्वरकलानादास्सदाशिवसमुत्भवाः॥४६॥

अनुग्रहप्रदोनित्यं सर्वसिद्धिप्रदायकः
एताभिसहितःपायात् सदापूर्वश्शिवस्तुमां॥४७॥

मातृकापातुमां नित्यं सर्वमन्त्रस्वरूपिणी
अखण्डैकरसानन्द करीमांपातुसर्वदा॥४८॥

अमृतेशीसदापातु दीपिनीपातुसर्वदा
मूलविद्योचमांपातु श्रीमत् त्रिपुरसुन्दरी॥४९॥

कामैश्वर्यादिभिर्युक्तोनित्याभिःपातुमांसदा
सर्वाधोमण्डुकाकारेरुद्रः कालानलोविभु॥५०॥

रक्षां करोतुमेनित्यं यामूलप्रकृतुश्चसा
ततश्चाधारशक्तिर्या ममरक्षांकरोतुसा॥५१॥

कूर्मस्तुसततं पायादनन्तोरक्षयेत्सदा

यस्यमूर्द्धिस्थितं चक्रं वराहः परिरक्षतु॥५२॥

दंष्ट्रेतस्यस्थितापृथ्वी नित्यंपातुवसुन्धरा

समुद्रसर्वदापातु सुरत्नैरमृतैर्ज्जलैः॥५३॥

रत्नद्वीपस्तुमेरक्षां करोतुस्वर्ण्णपर्वतः

करोतुकुळसुन्दर्या कामरूपःशिवासनं॥५४॥

पातुमांनन्दनोद्यानं पान्तुमांकल्पपादपाः

अधस्तेषांसदापातुविचित्रारत्नभूमिका॥५५॥

श्रीरत्नमन्दिरंदिव्यं चिन्तामणिविभूषितं

तत्रपत्मेमहादिव्ये प्रभामण्डलवेदिका॥५६॥

श्वेतच्छत्रंसदापातु रत्नमुक्तामणिप्रभं

प्रभामद्ध्यस्थितंपातु रत्नसिंहासनंचमां॥५७॥

सिंहासनस्य पार्श्वस्थो धर्म्मोज्ञान्श्चरक्षतु

वैराग्यं रक्षयेन्नित्यमैश्वर्यंपरिरक्षतु॥५८॥

अधर्मोरक्षयेन्नित्यमज्ञानं परिरक्षतु

अवैराग्यञ्चमांपायादनैश्वर्यञ्च रक्षतु॥५९॥

सिंहासनस्यमद्ध्यस्थादुर्गमां परिरक्षतु
मायामांपातुतत्रैव विद्यामांपरिरक्षतु॥६०॥

अनतोरक्षयेन्नित्यं फणपञ्चदशान्वितं
तन्मद्ध्यफणमद्ध्यस्थां महापत्मञ्च रक्षतु॥६१॥

आनन्दकन्दं मां पातु ज्ञाननाळञ्चसर्वदा
दळाप्रकृतिरूपं तां विकृत्याकारकेसरः॥६२॥

पातुमांपातुनित्यंसा तत्वरूपाचकर्ण्णिका
सूर्यस्यमण्डलंपातु पातुसोमस्यमण्डलं॥६३॥

वह्नेश्चमण्डलंपातु पातुसत्वञ्चमांसदा
रजश्चपातुमांनित्यं पातुनित्यं तमोगुणः॥६४॥

आत्माचैवान्तरात्माच परमात्माचरक्षतु
ज्ञानात्माचतथारक्षां करोतु मम सर्व्वदा॥६५॥

ज्ञानंमायाकलाविद्यातत्वात्मनोविभूतयः
रत्नसिंहासनेदेव्या रक्षांकुर्व्वन्तुसर्व्वदा॥६६॥

ब्रह्माविष्णुश्चरुद्रश्च ईश्वरश्च सदाशिवः

एतेपञ्चमहाप्रेतारक्षांकुर्वन्तु सर्वदा॥ ६७॥

सुधार्णवासनंपातु पातुपोतांबुजासनं

देव्यासनंसदापातु पातुचक्रासनञ्चमां॥ ६८॥

सर्वमन्त्रासनंपातु साध्यसिद्धासनञ्चमां

नवयोन्यासनं पातु सदामांममरक्षणं॥ ६९॥

करोतुकुळसुन्दर्याः कामरूपंशिवासनं

तत्रैवसंस्थितादेव्यो रक्षांकुर्वन्तुसर्वदा॥ ७०॥

त्रिपुरात्रिपुरेशीच त्रिपुराद्याचसुन्दरी

त्रिपुरावासिनीपश्चात् त्रिपुराश्रीश्चमालिनी॥ ७१॥

सिद्धांबाभैरवीत्येता स्त्रिपुराद्याश्चपान्तुमां

गुरवोदिव्यसिद्धौघा मानवौघास्त्रिधास्थिताः॥ ७२॥

मुनिवेदानागसंख्या रक्षांकुर्वन्तुसर्वदा

समस्तप्रकटागुप्ता तथागुप्ततराश्चये॥ ७३॥

सम्प्रदायाःकुलोत्तीर्णा निगर्भाश्चरहस्यगाः

परापररहस्याश्च अतिपूर्वरहस्यगाः॥ ७४॥

एताश्चसततंरक्षां कुर्वन्तां योगिनीगणाः

त्रैलोक्यमोहनंचक्रं प्रथमंपरिरक्षतु॥ ७५॥

अणिमापश्चिमेपातु लघिमाचोत्तरेतथा

पूर्वद्वारेचमहिमा ईशित्वंपातुदक्षिणे॥ ७६॥

वशित्वंपातुवायव्ये प्राकाश्यं पातुचेशके

भुक्तिसिद्धिस्तथाग्नेया मिच्चारक्षतुनैर्ऋते॥ ७७॥

अधःपातुसदाप्राप्ति स्सर्वकामप्रदायिनी

सर्वकामप्रदापातु चोर्द्धेपोर्द्धनिवासिनी॥ ७८॥

एता प्रथमरेखायां सर्वाप्रकटपूरिताः

भैर्वश्चासितांगोय कामरूपश्चपीठके॥ ७९॥

ब्रह्माणीसहितःपूर्वद्वारेमां परिरक्षतु

मलयेचाग्निदिग्भागे संस्थितोरुरुभैरवः॥ ८०॥

माहेशीसहितःपातु कुलाचार्यस्यहेतवे

चण्डकोलगिरौरक्षां कौमारीसहितोयमे॥ ८१॥

करोतुभैरवोनित्यं पूजकानाञ्चसिद्धये

वैष्णवीसहितक्रोधः कुलान्तेपीठराजके॥ ८२॥

नैर्ऋत्यांसर्वदापातु भोगमोक्षार्त्थसिद्धये
चौहार्येपश्चिमेपीठे वाराहीसहितश्चमां॥ ८३॥

उन्मत्तभैरवोरक्षां करोतु मम सिद्धये
जालन्धरेमहापीठे कपालीभैरवसदा॥ ८४॥

इन्द्राणीसहितोरक्षां वायव्यांप्रकरोतुमे
उद्यानेचोत्तरेपीठे चामुण्डासहितसदा॥ ८५॥

भीषणोभैरवःपातु साधकानाञ्चसिद्धये
संहारश्चण्डिकासार्द्धं देवीकोष्ठेचपीठके॥ ८६॥

ईशान्यांरक्षयेन्नित्यं कुळाचार्यस्यसिद्धये
एतेद्वितीयरेखायां संस्थिताश्चतुरश्रगाः॥ ८७॥

सर्वसंक्षोभिणिमुद्रा पश्चिमेपातु सर्वदा
द्राविणीचोत्तरेपातु पूर्वेचाकर्षिणीतथा॥ ८८॥

याम्येवश्यासदापातु चोन्मादामारतेतथा
ईशेमहाङ्कुशापातु त्रिखण्डापातुचानले॥ ८९॥

नैरृत्यांबीजरूपाच ऊर्द्ध्वंरक्षतुखेचरी

महामुद्रास्त्वधःपातु योगिनीयोनिरूपिणी ॥ ९० ॥

एताश्चक्रस्थितानित्यं सर्वकामफलप्रदाः

चतुरश्रेत्रिरेखायां रक्षांकुर्वन्तुसर्वदा ॥ ९१ ॥

सर्वाशापूरकंचक्रं द्वितीयंपरिरक्षतु

कामाकर्षणरूपाच बुध्याकर्षणरूपिणी ॥ ९२ ॥

अहंकाराकर्षणीच शब्दाकर्षणरूपिणी

स्पर्षाकर्षणरूपाच रूपाकर्षणरूपिणी ॥ ९३ ॥

रसाकर्षणरूपाच गन्धाकर्षणरूपिणी

चित्ताकर्षणरूपाच धैर्याकर्षणरूपिणी ॥ ९४ ॥

स्मृत्याकर्षणरूपाच नामाकर्षणरूपिणी

बीजाकर्षणरूपाच आत्माकर्षणरूपिणी ॥ ९५ ॥

अमृताकर्षणीदेवी शरीराकर्षरूपिणी

एताश्चक्रस्थितानित्यं स्वरगाष्षोडशेदळे ॥ ९६ ॥

सर्वाबीष्टप्रदादेव्यो रक्षांकुर्वन्तुसर्वदा

सर्वसंक्षोभणंचक्रं तृतीयंपरिरक्षतु ॥ ९७ ॥

अनंगकुसुमापूर्वे दक्षिणेऽनंगमेखला

पश्चिमेऽनंगमदना चोत्तरेमदनातुरा॥९८॥

अनंगरेखाचाग्नेयां नैकृत्येऽनंगवेगिनी

अनंगांकुशाचवायव्ये ईशेचानंगमालिनी॥९९॥

कवर्गाद्यष्टवर्गस्था अष्टौचानंगशक्तयः

रक्षांकुर्वन्तुतासर्वा देव्याश्चाष्टदळेस्थिताः॥१००॥

सर्वसौभाग्यदंचक्रं चतुर्थंपरिरक्षतु

सर्वसंक्षोभिणीशक्तिः सर्वविद्राविणीतथा॥१०१॥

सर्वाकर्षणशक्तिश्च सर्वाह्ळादनरूपिणी

सर्वसंमोहिनीशक्ति सर्वस्तंभनरूपिणी॥१०२॥

सर्वजृंभणशक्तिश्च सर्वतोवशकारिणी

सर्वरञ्जनशक्तिश्च सर्वोन्मादनस्वरूपिणी॥१०३॥

सर्वार्थसाधनीशक्तिः सर्वसंपत्तिरूपिणी

सर्वमन्त्रमयीशक्ति सर्वद्वन्दक्षयंकरी॥१०४॥

चतुर्दशारचक्रस्थारक्षांकुर्वन्तु सर्वदा

सर्वार्थसाधकचक्रं पञ्चमंपरिरक्षतु॥ १०५॥

सर्वसिद्धिप्रदादेवी सर्वसंपत्प्रदातथा
सर्वप्रियंकरीचैव सर्वमंगळकारिणी॥ १०६॥

सर्वकामप्रदादेवी सर्वदुःखविमोचिनी
सर्वमृत्युप्रशमनी सर्वविघ्नविनाशिनी॥ १०७॥

सर्वांगसुन्दरीदेवी सर्वसौभाग्यदायिनी
बहिर्द्दशारचक्रस्था रक्षांकुर्वन्तुसर्वदा॥ १०८॥

सर्वरक्षाकरंचक्रं षष्ठंरक्षन्तुसर्वदा
सर्वज्ञासर्वशक्तिश्च सर्वैश्वर्यफलप्रदा॥ १०९॥

सर्वज्ञानमयीदेवी सर्वव्याधिविनाशिनी
सर्वाधारस्वरूपाच सर्वपापहरातथा॥ ११०॥

सर्वानन्दमयीदेवी सर्वरक्षास्वरूपिणी
तथैवहिमहादेवी सर्वेप्सितफलप्रदा॥ १११॥

अन्तर्द्दशारचक्रस्थारक्षां कुर्वन्तुसर्वदा
सर्वरोगहरंचक्रं सप्तमंपरिरक्षतु॥ ११२॥

वाग्देवीवशिनीपातु पातुकामेश्वरीचमां

मोदिनीविमलापातु अरुणाजयिनीचमां॥ ११३॥

सर्वेश्वरीचमेरक्षां कुरुतांकौळिनीतथां

वाग्देव्यो वरदासन्तु सर्वास्तुष्यन्तुपूजिताः॥ ११४॥

अष्टकोणन्तरेवाण्यो रक्षांकुर्वन्तुसर्वदा

सर्वसिद्धिप्रदंचक्रं अष्टमंपरिरक्षतु॥ ११५॥

अष्टकोणान्तरेस्थाने त्रिकोणबहिरायुधाः

श्रीमत्पाशाङ्कुशधनुर्ब्बाणश्चायुधदेवताः॥ ११६॥

षडंगदेवता पान्तु अंगस्थंचांगदेवताः

श्रीमत्त्रिकोणमद्ध्येतु तत्रकोणरुयेपिच॥ ११७॥

तत्रनांसततंपातु कोणाग्रेपीठेदेवता

कामेश्वरीपातु पूर्णेवज्रेश्वरीतथा॥ ११८॥

जालन्धरेमहापीठे पातुमांभगमालिनी

ओड्याणकेमहापीठेतु पायात् त्रिपुरसुन्दरी॥ ११९॥

सर्वानन्दमयंचक्रं नवमंपरिरक्षतु

सूर्येन्दुवह्निपीठेतु बिन्दुचक्रनिवासिनी॥ १२०॥

ब्रह्मस्वरूपिणीपातु श्रीमत्त्रिपुरसुन्दरी

योनिमध्येतुपरितो नित्यंषोडशशक्तयः॥ १२१ ॥

देव्यःश्रीचक्रमध्यस्था रक्षांकुर्वन्तुसर्वदा

त्रैलोक्यमोहनेचक्रे चतुरश्रेसुशोभने॥ १२२ ॥

पातुमामनिशंदेवी त्रिपुरापरमेश्वरी

सर्वाशापूरकेचक्रे षोडशारेमनोहरे॥ १२३ ॥

तत्रचक्रेश्वरीनित्यं पातुमांत्रिपुरेश्वरी

तथाष्टदळचक्रेतु सर्वसंक्षोभकारके॥ १२४ ॥

तत्रचक्रेश्वरीनित्यं पायात्त्रिपुरसुन्दरी

चतुर्द्दशारचक्रेतु शुभेसौभाग्यदायके॥ १२५ ॥

तत्रचक्रेश्वरीनित्यं पातुत्रिपुरवासिनी

सर्वार्त्थसाधकेबाह्ये दशारेचक्रराजके॥ १२६ ॥

त्रिपुराश्रीसदापातु ममकल्याणहेतवे

अन्तर्द्दशारचक्रेतु सर्वरक्षाकरेपरे॥ १२७॥

नित्यंचक्रेश्वरीदेवी पायात्त्रिपुरमालिनी

तथाष्टकोणचक्रेतु सर्वरोगहरेपरे॥ १२८॥

पातुमांत्रिपुरासिद्धा देवी चक्रेश्वरीतथा
सर्वसिद्धिप्रदेचक्रे गुणकोणेमनोहरे॥ १२९॥

चक्रेश्वरीचमेरक्षां करोतु त्रिपुरांबिका
सर्वानन्दमयेचक्रे मध्येबिन्दौ सुशोभने॥ १३०॥

महाचक्रेश्वरीपातु श्रीमत्त्रिपुरभैरवी
नित्यामामेश्वरीपातु पातुमांभगमालिनी॥ १३०॥

नित्यक्लिन्नाचमांपातु भेरुण्डापातुसर्वदा
मांवह्निवासिनीपातु महाविद्येश्वरीतथा॥ १३१॥

शिवदूतीचमांपातु त्वरितारक्षयेत्सदा
कुळसुन्दरिमांपातु नित्यानित्यंच पातुमां॥ १३२॥

नित्यानीलपताकाच विजयापातुसर्वदा
श्रीसर्वमंगळापातु नित्याज्वालासुमालिनी॥ १३३॥

विचित्रासर्वदापातु षोडशीपातुसुन्दरी
षोडशीप्रथमानित्या त्रिपञ्चतिथिगामिनी॥ १३४॥

अनुलोमविलोमेन श्रीलत्त्रिपुरसुन्दरी

महाविद्यातुरीयातु पातुमांबहुरूपिणी॥ १३५॥

महासप्तदशीविद्या नित्यमानन्दरूपिणी

चतस्त्रसमयादेव्यो योगिन्यःपान्तुसर्वदा॥ १३६॥

चतुरश्रेमहाचक्रे तारामांपरिरक्षतु

डाकिनीराकिनीपातु लाकिनीकाकिनीतथा॥ १३७॥

डकिनीहाकिनीपातु याकिनीसर्वरूपिणी

वर्णस्थामातृकासर्वाश्चक्रराजेसुपूजिताः॥ १३८॥

श्रीचक्रेपूजितायायापूजितायानपूजिताः

सर्वास्ताःपूजिताश्चास्तु श्रीमत्त्रिपुरसुन्दरी॥ १३९॥

चतुरश्रेमहाचक्रे बुद्धोमांपरिरक्षतु

पातुमामनिशंदेवषोडशारे प्रजापतिः॥ १४०॥

तथाष्टदळचक्रेतु शिवोमांपरिरक्षतु

चतुर्दशारचक्रेतु भास्करोरक्षयेत्सदा॥ १४०॥

पातुप्रभुर्न्नारायणोहरिः

अष्टेरमध्यचक्रेतु पातुमांभुवनेश्वरी॥ १४१॥

अष्टारान्तस्त्रिकोणेतु कालिकापातुसर्वदा

त्रिकोणन्तरचक्रेतु पातुकात्त्यायनीसदा॥ १४२॥

नवचक्रेश्वरीनित्यायानित्यापरमापरा

पातुमामनिशंदेवी श्रीमत्त्रिपुरसुन्दरी॥ १४३॥

श्रीमत्त्रिपुरसुन्दर्या चिन्तनीयाचयावरा

ब्रह्मस्वरूपिणीपातु पञ्चमीपरदेवता॥ १४४॥

पञ्चमीपातुसततं नित्यंरक्षतुपञ्चमी

शान्तिंकरोतुसानित्या पञ्चमीपरदेवता॥ १४५॥

सापुनःपञ्चमीशक्तिर्न्नित्यं चैत्यन्यरूपिणी

कारणान्दमद्ध्यस्था पातुमांपञ्चमीसदा॥ १४६॥

पञ्चत्वात्पञ्चमीनित्या रविमानौघपञ्चधा

पातुमांपञ्चमीनित्या पञ्चमीपरदेवता॥ १४७॥

पञ्चबाणाक्षरैर्मन्त्रैः पञ्चकूटैवपञ्चमी

रक्षांकरोतुमेनित्यं पञ्चमीपरदेवता॥ १४८॥

गणेशोवटुकश्चैव क्षेत्रेशोयोगिनीगणाः

तर्पिताबलिपात्राणि सर्वैरक्षन्तुपूजिताः ॥ १४९ ॥

ऐशान्यांसर्वदापातु नित्यंनिर्माल्यवासिनी
शेषिकासुन्दरीपातु बिन्दुचक्रनिवासिनी ॥ १५० ॥

नित्यंकामकलापातु मुद्रांमांपातुखेचरी
शक्तिर्मांसर्वदापातु यामूलाधारनिवासिनी ॥ १५१ ॥

मुद्रामन्त्रोपचारैस्तु समस्तादेवताश्चयाः
याश्रीश्चपूजिताचास्तु श्रीमत्त्रिपुरसुन्दरी ॥ १५२ ॥

श्रीमत्त्रिपुरसुन्दर्यास्तवराजं मनोहरं
पूजाक्रमेणकथितं साधकानांसुखावहं
ॐ श्रीमहा त्रिपुरसुन्दर्यै नमः ॥

शुद्धविद्याचबाला च द्वादशार्द्धामतंगिनी
एताः कामगिरीन्द्रस्थाः पूर्वाम्नायस्यदेवताः ॥ १५४ ॥

गुरुत्रयादिपीठान्तं चतुर्विंशत्सहस्त्रकं
एतदावरणोपेतं पूर्वाम्नायंभजाम्यहं ॥ १५५ ॥

सौभाग्यविद्याबगळावाराहीवटुकस्तथा
श्रीतिरस्करिणीप्रोक्ता दक्षिणाम्नायदेवताः। १५६ ॥ ।

त्रिंशत्सहस्रंदेवस्य पूर्णपीठस्थितासदा
भैरवादिपदद्वन्दं भजे दक्षिणमुत्तमं॥ १५७॥

लोपामुद्रामहादेवीह्यंबाच भुवनेश्वरी
अन्नपूर्णाकामकलातथाजाळन्धरस्थिता॥ १५८॥

दौत्यादीनां चतुषष्टिसिद्धानान्तु सहस्रकं
आम्नायंपश्चिमंवन्दे सर्वदासर्वकामदं॥ १५९॥

तुर्यांबा च महार्द्धा च अश्वारूढा च श्यामळा
मिश्रांबाच महादेवी श्रीमद्वाग्वादिनीतथा॥ १६०॥

एताश्चोड्याणपीठस्थात्रिसहस्रन्तु देवताः
मुद्रादिनवकंचैव सिद्धानां मिथुनानि च॥ १६१॥

वीरावळ्याश्चमिथुनं भजाम्याम्नायमुत्तमं
परापराचसादेवी परादेवीचशांभवी॥ १६२॥

एतौशांभवपीठस्थौ सहस्रपरिवारितौ
आरभ्यमालिनीपूर्वं मण्डलान्तंभजाम्यहं। १६३॥।

सायूज्यहेतुकंदिव्यं वन्देचोर्द्धमकल्मषं

पश्चादनुत्तरंवन्दे परब्रह्मस्वरूपिणं॥ १६४॥

त्रिसन्ध्यंयःपठेद्विद्वान् आम्नायस्तवमुत्तमं
सर्वपापविशुद्धात्मा सर्वैश्वर्यसमन्वितः॥ १६५॥

भुक्त्वाभोगानुयथाकामं सर्वभूतहितेरतः
पार्वतीरूपमाप्नोति वेदवाक्यानुसारतः॥ १६६॥

श्रीनाथादिगुरुत्रयंगणपतिं पीठत्रयंभैरवं
सिद्धौघंवटुकत्रयं पदयुगंदूतीक्रमंमण्डलं
वीराद्यष्टचतुष्कषष्टिनवकं वीरावळीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्देगुरुंमण्डलं॥ १६७॥

क्रमेणानेनविधिना श्रीमत्त्रिपुरसुन्दरीं
पूजयेत्साधकश्रेष्ठा रक्षामन्त्रंसदापठेत्॥ १६८॥

प्रातःकालेशुचिर्भूत्वा निशायामर्द्धरात्रके
अथवासङ्कटेप्राप्ते राजद्वारेषुदुर्गमे॥ १६९॥

जलेवाचानलेवापि श्मशानेदुर्जनेगिरौ
यत्रयत्रभयेप्राप्ते सर्वत्रैवपठेन्नरः॥ १७०॥

सर्वावयवभावेन देवींसंचिन्त्यसाधकः

रक्षांकुर्वीतयत्नेन सर्वाशुभविनाशिनीं॥ १७१ ॥

स्तोत्रंचात्भुतमेवेदं त्रैलोक्यचापिदुर्ल्लभं

गोपनीयंप्रयत्नेन यदीच्चेत्सिद्धिमात्मनः॥ १७२ ॥

यस्मैकस्मैनदातव्यं नवक्तव्यंकदाचन

शिष्यायभक्तियुक्ताय साधकायप्रकाशयेत्॥ १७३ ॥

दृष्टेभ्यसाधकेभ्योपि बान्धवेभ्योनदर्शयेत्

दत्तेचसिद्धिहानिस्यादित्याज्ञाशाङ्करीकृता॥ १७४ ॥

मन्त्रा पराङ्‌ मुखायान्तिक्रुद्धा भवतिसुन्दरी

अशुभञ्चभवेत्तस्य तस्माद्यत्नेनगोपयेत्॥ १७५॥

यत्गृहेविद्यतेस्तोत्रं ग्रन्थंलिखितमुत्तमं

चञ्चलापिस्थिराभूत्वाकमलातत्रतिष्ठति॥ १७६ ॥

तस्माद्यत्नादिदंग्रन्थं पूजयेत्गन्धपुष्पकैः

पूजाफलंलभेन्नित्यं सान्निध्यात् सुन्दरीभवेत्॥ १७७॥

स्तवराजमिदंपुण्यंयः पठेत्सृसमाहितः

यत्फलंलभतेतस्मात् श्रृण्वतांसाधकोत्तमः॥ १७८॥

वरमेतत्तुयोधीमान् प्राप्नुयात्पूजनाफलं
वेदितामातृचक्रस्य साधकोभुविजायते॥ १७९॥

मासमेकंक्रमेणैव पठेत्भक्तिपरायणः
स्वर्गेपिविदितोभूत्वा देवीभक्तस्तुभूतले॥ १८०॥

भक्त्याचधारयेद्यस्तु लिखित्वास्तोत्रमुत्तमं
शिखायामथवामण्ठे करेवावामदक्षिणे॥ १८१॥

सभवेत्साधकश्रेष्ठो मन्त्रानाञ्चभवेत्प्रियः
लभतेसर्वकामारिपरंस्वस्त्ययनंयतः॥ १८२॥

तस्मात्सर्वप्रयत्नेनधारयेद्विधिनासदा
पठित्वापूजयित्वातु त्रैलोक्यंवशमानयेत्॥ १८३॥

भक्तायलभतेतस्मै मन्त्रंरक्षाकरंपरं
धृत्वासौवर्णमध्यस्थं सर्वकामानरोलभेत्॥ १८४॥

यानिवाञ्चन्तिकामानि भुक्तिमुक्तिकराणिच
लभतेनात्रसन्देहो भुविस्वर्गेरसातले॥ १८५॥

दृष्ट्याचसाधकश्रेष्ठं ग्रहराक्षसहिंसकाः
दूरादेवपलायन्ते न समर्थाश्चहिंसितुं॥ १८६॥

विषंविर्विषतांयाति पापंनिर्यातिचक्षयं

देववन्मानवोभूत्वाभुनक्तिबहुलंसुखं॥ १८७॥

तस्मानित्यंपठेद्धिमान् मुक्तिकामार्थसिद्धये

भक्त्याचाराधयेदेवीं स्वरक्षांसर्वमाचरेत्॥ १८८॥

पूर्वजन्मपरिज्ञानवेद्यंजन्मसहस्त्रकं

नपुनर्जायतेयोनौ वरणंनास्तिचापरं॥ १८९॥

गन्धर्वरूपवान्भूत्वा संपूज्यपरमेश्वरीं

रक्षामन्त्रंपठित्वाच देवत्वंलभतेध्रुवं॥ १९०॥

अपुत्रोलभतेपुत्रं दरिद्रोलभतेधनं

असाध्यंसाधयेत्सर्वं दुर्लभंलभतेचिरात्॥ १९१॥

अतिदुःखालभयेघोरे हिमेनिगळबन्धबे

तत्रयस्तुपठेत्भक्त्या ध्रुवंमुच्येतबन्धनात्॥ १९२॥

अत्यन्तरोगयुक्तोपि यदिदेवींप्रपूजयेत्

सर्वंवाश्लोकमेकंवा सद्योरोगात्प्रमुच्यते॥ १९३॥

मोहनस्तंभनाकर्षमारणोच्चाटनं तथा

अल्पकालेनजगति सर्वांसिद्धिमुपालभेत्॥ १९४॥

इथंत्रिपुरसुन्दर्याः स्तवराजंमनोहरं
रक्षामन्त्रञ्चविधिवत् शिवेनपरिकीर्त्तितं॥ १९५॥

सर्वमंगळमांगल्ये शिवे सर्वात्थर्साधके
शरण्येत्र्यंबकेदेवी नारायणी नमोस्तुते॥ १९६॥

इति ललितोपाख्यानरहस्यनाम्नि षष्ठोध्यायः॥

॥ शुभमस्तु॥

kindly send any corrections/suggestions on this document to menonar@yahoo.com